Extent.— 2 leaves ; 14 lines to a page ; 54 letters to a line.

Description.— Country paper worn out and musty. Devanāgarī Characters ; handwriting large, uniform and clear. See no. 207 ( गद्यत्रय ) for other description.

Age.— Fairly old.

Author.— Kūratālvāra.

Begins.— fol. 5[b].

श्रीमते रामानुजाय नमः ॥

वात्सल्यादभयप्रदानसमयादार्त्तार्त्तिनिर्वापणा-
दौदार्यादपशोषणादगणितः श्रेयः पदः प्रापणात् ॥
सेव्यः श्रीपतिरेक एव जगतामेते सदा साक्षिणः ।
प्रल्हादश्च विभीषणश्च कविराड् पांचालयहव्या ध्रुवः ॥ १ ॥ etc.

Ends.— fol. 6[a].

आर्ता विषण्णा शिथिलाश्च भीता घोरेषु व्याधादिषु वर्त्तमानाः ।।
संकीर्त्य नारायणशब्दमात्रं विमुक्तदुःखा सुखिनो भवंति ॥ ९ ॥
इति श्रीमत्कूरताल्वारविरचितं नारायणाष्टकं संपूर्णं ।। श्रीः

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum :—
Not mentioned.

---

निगमार्थदीपन Nigamārthadīpana

No. 396 No. $\frac{:649}{1887\text{-}91}$

Size.— 6⅛ in. by 4¼ in.

Extent.— 21 leaves ; 12 lines to a page ; 32 letters to a line.

Description.— Modern paper thin, tough, smooth and light grey. Devanāgarī Characters ; handwriting medium, clear and uniform. Fol. 19 is missing. Ms. appears to be incomplete.

Age.— Fairly old.

Begins.— fol. 1[a].

श्री १५ सांबाय गुरवे नमः ॥ अथ
निगमार्थदीपनम् ।

मायोल्लासाः क्षरा ये हरिहरविधयो यश्च मायाश्रयोऽन्य-।
स्तेषामीशो महात्माऽक्षर इति गदितोऽशेषविष्ण्वादि वंद्यः ॥
तस्यापीशश्चिदात्मा विहरति परया लीलया यः सखीभि-।
र्धाम्नि श्वेतं किशोरं निरुपमरमणं चाक्षरातीतमीडे ॥ १ ॥
प्रौढाज्ञानविनाशनैकचतुरां सत्प्रेमलक्षां चितां ।
धामोद्दामविवेचनैकजननीं सत्तारतम्यान्वितां ।।
योऽद्धात्छ्रीयुतछत्रशालधरणीपालाय विद्यां परां ।
तं वंदे मुनिवृंदवंदितपदं श्रीप्राणनाथाभिधं ॥ २ ॥
कलौ प्रादुर्भूतो य इह करुणाकल्पिततनुः ।
स्ववाणीभिर्मायावरणविनिपाताय जगतां ॥

परः शुद्धो बुद्धो निगमगदितो धामनिलयो ।
हरीशद्यैर्वंद्यो जयति स सखीप्राणरमणः ॥ ३ ॥
तारतम्यमवगम्य पुण्यतः प्राणनाथपरमानुकंपया ॥
संतनोमि निगमार्थदीपनं तत्वतः परमहंसतुष्टये ॥ ४ ॥
अबोधादन्यथा नीतः श्रुत्यर्थो बहुधा बुधैः ॥
प्राणनाथोपदेशेन स यथार्थो निगद्यते ॥ ५ ॥ etc.

Ends.— fol. 21[a].

उक्तमर्थं स्पष्टयति ।
सदैवैतत्परमं ब्रह्म धाम यत्र विश्वं निहितं भाति शुभ्रं ॥
उपासते पुरुषं येह्यकामास्ते शुक्रमेतधिवर्तंति धीराः ॥

एत —

fol. 21[b]. (in a different hand).

भटफकिर गणपतिशंकर रांढेर कृष्णाचीवालानुं पुस्तक छे—लइजसेने आपसे नही तेने—सरस्वतिनो आपछे ।

कारतक शुक्लपक्ष १५ ने वार अर्क-
तारीख १८-११-सने ८८ ए लेख
शुभमस्ति

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum :—
III 63[a].

---

निम्बार्कतत्त्वनिर्णय Nimbārkkatattvanirṇaya

No. 397 No. $\frac{705\text{–A}}{1884\text{–}87}$

Size.— $12\frac{3}{8}$ in. by $5\frac{7}{8}$ in.

Extent.— 6 leaves ; 10 lines to a page ; 34 letters to a line.

Description.— Country paper thin, smooth and grey. Devanāgarī characters ; handwriting large clear and uniform. Red chalk occasionally used for smearing important key words. Yellow pigment for corrections. Ms. forms part of another work (fol. 6[b]–11[b]) called पंचसंस्कारप्रमाणविधि No. 705–B of 1884–87.

Age.— Saṁvat 1846.

Author.— Nandadāsa.

Begins.— fol. 1[b].

ओं नमो भगवते श्रीनिंवादित्याय ॥
ओं वृंदादेवीं नमस्कृत्य राधिकां च हरिं गुरुं ॥
सुबोधाय सतां बक्ष्ये निंवार्कतत्त्वनिर्णयम् ॥ १ ॥
निंवार्कोहं स एवात्र श्रीमन्नारायणः स्वयं ॥
भक्ताभिलाषवर्षित्वस्यान्यत्रानुपपत्तितः ॥ २ ॥
सर्वाभिलाषसेकार्थान्निविसेचन इत्यतः ॥
धातोरिति वदंत्येके पदवाक्यप्रमाणगाः ॥ ३ ॥ etc.

Ends.— fol. 6[b].

मा । स्थाय नंदनंदनपार्श्वतः ॥ ९६ ॥
नित्यानि त्रीणि रूपाणि यस्योक्तानि महात्मनः ॥
श्रुत्यागमपुराणेषु स भूयाच्छरणं मम ॥ ९७ ॥
इति श्रीनंददासविरचिते निंवार्कतत्त्वनिर्णयः समाप्तम् ॥

References.—

(1) Mss.—A-Áufrecht's Catalogus Catalogorum:— I 297[a]; II 64[b]; III 63[b].

---

निरुक्तिलक्षणा — Niruktilakṣaṇā

No. 398 — No. 415/1875-76

Size.— $9\frac{7}{8}$ in. by $4\frac{3}{16}$ in.

Extent.— 11 leaves; 10 lines to a page; 29 letters to a line.

Description.— Country paper thin, rough, old and dark grey. Devanāgarī Characters; handwriting medium large, clear and uniform. Names of speakers, beginning and end smeared with red chalk. Yellow pigment used occasionally for corrections. Ms. contains 183 verses.

Age.— Saṁvat 1742.

Begins.— fol. 1[b].

श्रुतय ऊचुः ॥

श्रुतमस्माभिरीशानं रहस्यं परमाद्भुतं ॥
इदं विश्वं कथं जातं सौमित्रे वद तत्त्वतः ॥ १ ॥

सौमित्रिरुवाच ॥

शृणुध्वं श्रुतयः सर्वा रहस्यं सृष्टिसंभवं ॥
यथादः परिसंभूतं यस्मिन्नेव प्रलीयते ॥ २ ॥
शृष्टिरग्रे परे धाम्नि संवादं समभूत्किल ।
महाशंभुर्महाविष्णुर्महामायेरितः पुनः ॥ ३ ॥ etc.

Ends.— fol. 11[b].

उच्चाटनं च पापानां दीपनं जडचेतसां ॥
पठनाच्छ्रवणाद्यस्य मुक्तिरेव न संशयः ॥
तस्मात्सर्वप्रयत्नेन पठितव्यं समाहितैः ॥ ॥ १९३ ॥
इति श्रीनिरुक्तलक्षणायां शिवसंहितायां परमरहस्ये
रामानुजवेदसंवादेन वांशके तत्त्वोत्पत्तिर्नवमोऽध्यायः ॥
संवत् १७४२ का भादवास्य मावस लिषितं
वनमालीदासवैष्ण आत्मविचारणात्

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum:—
I 297[b].

---

## निरोधग्रंथविवरण — Nirodhagranthavivaraṇa

No. 399 — No. 100 / A 1882-83

Size.— 10⅛ in. by 4⅝ in.

Extent.— 14 leaves ; 8 lines to a page ; 45 letters to a line.

Description— Country paper thin, smooth and greyish. Devanāgarī Characters ; handwriting beautiful and uniform. Borders ruled with double or treble red lines. Beginning and end as well as punctuation-marks in red. Foll. eaten away on left margin. Some foll. are also worm-eaten in the centre. The title is :—निरोधवर्णग्रंथस्य विवरण or निरोधलक्षणटीका. Yellow pigment used occasionally for corrections.

Age.— Fairly old.

Author.— Harirāya.

Begins.— fol. 1[b].

॥ श्रीमथुरेशो जथति ॥

॥ भक्तभावस्वरूपाय तन्मार्गव्यंजकाय च ॥
तद्दानायात्तदीक्षाय स्वाचार्यप्रभवे नमः ॥ १ ॥
विरागादिंद्रियाणां वै निरोधे सति साधनैः ॥
यमादिभिश्च विज्ञाने ज्ञाने भवति सत्फलं ॥ २ ॥
तदभावेन सर्वेषु प्राकृतांश(श)निवृत्तितः ॥
भक्तिमार्गे कथं साक्षात्फलं भवति तत्वतः ॥ ३ ॥
निःसाधनांगीकृतस्य स्यात्फलं रोधतो यथा ॥
तदर्थसाधनं रूपं तस्य स्वाध्वनिवर्ण्यते ॥ ४ ॥ etc.

Ends.— fol. 14[a].

फलमपि महत्सर्वोत्कृष्टमिति गुणगानस्यैव सर्वातिशयत्वं निरूपितं ॥
श्रीमदाचार्यचरणसरोजसततस्मृतेः ॥
ममार्थावगतिर्जाता दुर्बोधेष्यत्र निश्चितं ॥ १ ॥
इति श्रीवल्लभाचार्यविरचितविरोधवर्णग्रंथस्य विवरणम् ॥ ॥ श्रीः ॥

( in a different hand.
श्रीहरिरायजीकृतनिरोधलक्षणटीका )

References.—

(1) Mss.—A–Aufrecht's Catalogus Catalogorum:—
निरोधलक्षणविवरण by Harirāya. I 297[b].

B–Descriptive Catalogues:—
For original text, see Ind. off-Cat. I, iv, no. 2515 (ii), p. 827[a]; and Mad. Cat. XI, p. 3931, No. 5127.

(2) Printed Editions:—
Nirodhalakṣaṇa, with commentaries of Gopeśa, Kākā Vallabha, Hari-dhana, Vallabha, Puruṣottama, and Vajrarāja, edited by M. T. Telīvālā and D. V. Sankalia, Bombay 1917.

निरोधलक्षण Nirodhalakṣaṇa

No. 400 No. $\frac{310\text{-B}}{1895\text{-}98}$

Size.— 5§ in. by 5⅛ in.

Extent.— 3 leaves ; 9 lines to a page ; 15 letters to a line.

Description.— Country haper ; Devanāgarī Characters ; handwriting bold and uniform. See Ms. No. 310-A of 1895-98 (सिद्धांतरहस्य) for full patficulars. This work consists of 19 verses.

Age.— Fairly old.

Author.— Vallabhācārya.

Begins.— fol. $2^{a}$.

अथ निरोधलक्षणं ॥

यच्च दुःखं यशोधाया नंदादीनां च गोकुले ॥
गोपिना च यदुःखं तदुपस्यान्मम क्वचित् ॥ १ ॥ etc.

Ends.— fol. $4^{b}$.

तदा विनिग्रहतस्य कर्त्तव्य इति निश्चये ॥
नातः परतरो मंत्रो नातः परतरः स्तवः ।
नातः परतरा विद्या तीर्थं नास्ति परात्परं ॥ १९ ॥
इति श्रावल्लभाचार्यविरचितं निरोधलक्षणसंपूर्णं ॥

References.—

Mss.—A-Aufrecht's Catalogus Catalogorum :—
I $297^{b}$; II $64^{b}$; $207^{b}$; III $63^{b}$,

B-Descriptive Catalogues:—
Ind. Off. Cat. I, iv, no. 2515 (ii), p. 827.
Mad. Cat. XI, p. 3931, no. 5127.

निरोधलक्षणवर्णन Nirodhalakṣaṇavarṇana

No. 401 No. $\frac{716\text{-D}}{1884\text{-}87}$

Size.— 9½ in. by 5¼ in.

Extent.— 2 leaves ; 10 lines to a page ; 32 letters to a line.

Description.— Country paper ; Devanāgarī Characters ; handwriting good. See Ms. No. 716-A of 1884-87 for further particulars. Contains 20 verses.

Age.— Old.

Author.— Vallabhadīkṣita.

Begins— fol. 5[a].

यच्च दुःखं यशोदाया नंदादीनां च गोकुले ॥
गोपिकानां च यद्दुःखं तद्दुःखं स्यान्मम क्वचित् ॥ १ ॥
गोकुले गौपिकानां तु सर्वेषां वज्रवासिनां ॥
यद्दुःखं समभूत्तन्मे भगवान् किं विधास्यति ॥ २ ॥
उद्धवागमने जातः उत्सवः सुमहान्यथा ॥
वृंदावने गोकुले वा तथा मे मनसि क्वचित् ॥ ३ ॥

Ends. fol. 6[b].

नातः परतरो मंत्रो नातः परतरः स्तवः ॥
नातः परतरा विद्या तीर्थं नातः परापरं ॥ २० ॥

॥ ठ ॥ ॥ इति श्री वल्लभदीक्षितविरचितं निरोधलक्षणवर्णनं ॥
॥ ठ ॥ ॥ लिपितं ओ. हरीराम ॥ ॥ ठ ॥ ॥ शुभं भवतु ॥
॥ ठ ॥ ॥ ठ ॥ कल्याणमस्तु ॥ ठ ॥ ॥ ठ ॥ ॥ ठ ॥ ॥ ठ ॥ ॥ ठ ॥

References.— See No. 400.

निरोधलक्षणविवृति Nirodhalakṣaṇavivṛti

No. 402 No. $\frac{111}{1871-72}$

Size.— 10 in. by 5§ in.

Extent.— 21 leaves ; 10 lines to a page ; 32 letters to a line.

Description.— Country paper thin, smooth, tough and grey. Devanāgarī Characters ; handwriting beautiful and uniform. Borders ruled with double black lines. Red chalk marks beginning, colophon and text citations in the work. White pigment used for corrections. Fol. 1 is repaired and reinforced.

Age.— Old.

Author.— Haridāsa.

Begins.— fol. 1[b].

॥ श्रीकृष्णाय नमः ॥

नमामि श्रीमदाचार्याननल्पकरुणायुतान् ॥
निरोधफलदानाय प्रभुणा प्रकटीकृतान् ॥ १ ॥

यदीयचरणांभोजचरणं मूर्त्तिमत्प्रभोः ॥
तत्कृपातो निरूप्येहं निरोधविवृतिं मुदा ॥ २ ॥

तदाविर्भावितश्रीमत्प्रभुसेवारसात्मकः ॥
अस्मत्प्रभुः कृपयतु प्रियः श्रीविट्ठलेश्वरः ॥ ३ ॥

वंदे पितृपदांभोजं श्रीमदाचार्यसंश्रितः ॥
यतोहमभवं सर्वसाधनाभाववानपि ॥ ४ ॥

अथोपोद्घाततयेदं विचार्यते ॥ को निरोधः किं च तस्य कारणं कथं वा फलत्वमिति । तत्रोच्यते ॥ etc.

Ends.— fol. 21[b].

तीर्थस्य सकल साधनमूलभूतमनोमार्जकतयोत्कृष्टत्वेपि गुणगानादेः सत्वं च शुध्यत्यचिरेण पुंस इति वाक्यादविलंबेन चित्तशोकत्वात्सर्वतीर्थरूपत्वाच्च सांप्रतं तेषां दुष्टावृत्तत्वेन तिरोहिताधिदेवत्वेन चासाधकत्वादेतस्मात्परात्सर्वोत्कृष्टात्साधनयुग्मात् तीर्थं न परमुत्कृष्टमिति स्वसिद्धांतनिष्कर्षो निरूपित इति दिक् ॥

स्वाचार्यं चरणद्वंद्ववंदनादरसाधनात् ॥
निरोधलक्षणं ग्रंथं विवव्रे हरिदासकः ॥
इति श्रीमन्निजाचार्यचरणोभिषेकलब्धमहाराज्यसुखानुभूतिश्रीहरिदासविरचिता निरोधलक्षणविवृतिः समाप्ता ॥ ॥ श्री ॥ ॥ श्री ॥
॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum :—
I 297$^{b}$; II 64$^{b}$; 207$^{b}$; III 63$^{b}$.

---

निरोधलक्षणविवृति Nirodhalakṣaṇavivṛti

No. 403 No. $\frac{719}{1884\text{-}87}$

Size.— 9½ in. by 5⅜ in.

Extent.— 26 leaves ; 9 lines to a page ; 32 letters to a line.

Description.— Country paper thin, smooth, tough and dark grey. Devanāgarī Characters ; handwriting bold clear and uniform. · Many foll. discoloured.

Age.— Saṁvat 1743.

Author.— Haridāsa.

Begins.— fol. 1$^{b}$.

श्रीकृष्णाय नमः ॥
नमामि श्रीमदाचार्याननल्पकरुणायुतान् ॥ etc.

Ends.— fol. 26$^{b}$.

निरोध लक्षणं ग्रंथं विवव्रे हरिदासकः ॥
॥ इति श्री निजाचार्यचरणाभिषेक... हरिद्सविरचिता निरोधलक्षणविवृतिः समाप्ता ॥ ॥ ठ ॥ ॥ ठ ॥
॥ संवत् १७४३ वर्षे वैशाष शुदि सोमे । भट्ट-गोविंदेन लिखितं याडशमिति ॥
॥ ठ ॥ ॥ ठ ॥ ॥ ठ ॥ ॥ ठ ॥

---

निरोधलक्षणविवृति Nirodhalakṣaṇavivṛti

No. 404 No. $\frac{711}{1887\text{-}91}$

Size.— $11\frac{5}{16}$ in. by $5\frac{1}{2}$ in.

Extent.— 23-1 leaves ; 9 lines to a page ; 38 letters to a line.

Description.— Country paper thick, rough and dark grey. Devanāgarī Characters ; handwriting large beautiful and uniform. Borders ruled with triple red lines. Red chalk marks important passages as well as punctuation marks. Occasional marginal additions and corrections. Fol. 10 missing.

Age.— Old.

Author.— Haridāsa.

Begins.— fol. $1^b$.

श्रीकृष्णाय नमः ॥

॥ नमामि श्रीमदाचार्याननल्पकरुणायुतान् ॥ etc.

Ends.— fol. $23^b$.

निरोधलक्षणं ग्रंथं विवग्रे हरिदासकः ॥ १ ॥

इति श्रीमन्निजाचार्यचरणदासानुदास हरिदासविरचिता निरोधलक्षण-विवृतिः समाप्तः ॥ ॥ शुभं भवतु ॥

---

निर्वाणविचार Nirvāṇa-vicāra

No. 405 No. $\frac{268}{1892\text{-}95}$

Size— 10 in. by $3\frac{5}{8}$ in.

Extent.— 9 leaves ; 12 lines to a page ; 55 letters to a line.

Description.— Country paper thin, rough and dark grey. Devanāgarī Characters ; handwriting small, but legible. The foll. are not all of uniform size. The Ms. deals with the definition of *mukti* or final liberation.

Age.— Fairly old.

Begins.— fol. 1[a]. ( In later hand निरवाणविचार )

श्रीगणेशाय नमः ॥ आत्यंतिकी दुःखनिवृत्तिर्मुक्तिरित्याचार्य्याः ॥ तत्र दुःखनिवृत्तिनिष्ठात्यंतिकत्वस्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वं ॥ तथा च etc.

Ends.— fol. 9[b].

न शुद्धबुद्धिर्न च चित्तशुद्धिर्न शास्त्रसिद्धांतमितज्ञता च ॥
अस्मादृशः स्वल्पविलोलजल्पनं तथापि धीरैः कृपयानहेयं ॥
इति निर्वाणविचारः समाप्तः ॥

उत्तिष्ठ क्षपानेकसुद्गसखे दरिद्र भारं मम ।
श्रांतस्तावदहं चिराय मरणं सेवेत्वदीयं सुखं ॥
इत्युक्तं धनवर्जितस्य वचनं श्रुत्वा श्मशानेशवं ।
दारिद्र्यान्मरणं वरं वरमिति ज्ञात्वैव तूष्णीं स्थितः ॥
सालंकारमचेतनस्य पुरतो या पठ्यते भारती ।
नो जानाति स पातकी किमपरं सैव स्वयं म्लायते ॥
भर्त्तुः स्नेहवसात् प्रविश्य दहनं भस्मीभवत्यंगना ।
गाढालिंगनतत्परेण मनसा प्रेतो नवेत्ति प्रियां ॥ १ ॥
विद्वांसो वसुधातले परवचः श्लाघासु वाचंयमा ।
भूपालाः कमलाविलासमदिरोन्मीलन्मदापूर्णिताः ॥
स्याप्येधास्यति कस्य लास्यमधुना धन्यस्य कामालसः ।
स्वर्वामाधरमाधुरीमधरयन्वाचां विपाको मम ॥ २ ॥

( In a different and later hand.
त्वयि वर्षति राजेंद्रे सर्वे पल्लविता द्रुमाः ॥
अस्माकमर्कवृक्षाणां पूर्वपत्रेषु संशयः॥ १ ॥ )

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum :— III 64[a].

निर्वाणाष्टक Nirvāṇāṣṭaka

No. 406 No. 149/1891-95

Size.— 8 in. by 4 in.

Extent.— 1 leaf ; 7 lines to a page ; 23 letters to a line.

Description.— Country paper thick, tough, but smooth and grey. Devanāgarī Characters ; handwriting bold, clear and uniform. Borders ruled with double red lines. Beginning and punctuation-marks in red. In view of only 6 verses found in this Ms. it is difficult to explain the title *Nirvāṇāṣṭaka* instead of *Nirvāṇa-ṣaṭka*.

Age.— Saṁvat 1881.

Author.— Śaṁkarācārya.

Begins.— fol. 1[a].

श्रीगणेशाय नमः ॥

मनोवुद्धिहंकारचित्तानि नाहं ॥
न श्रोत्रं न जिह्वा न च घ्राणनेत्रं ॥
न चाव्योमभूमिर्न तेजो न वायुः ॥
चिदानंदरूपं शिवोहं शिवोहं ॥ १ ॥ etc.

Ends.— fol. 1[b].

अहं निर्विकल्पो निराकाररूपो ॥ विमुक्तां च सर्वत्र सर्वेंद्रियाणिः ॥
नचाषण्मतो नैव मुक्तिर्नचोभि ॥ चिदानंदरूपं शिवोहं शिवोहं ॥ ६ ॥
इति श्रीमत्संकराचार्य्यविरचितं निर्वाणाष्टकसंपूर्णं ॥
संवत् ॥ १९९१ ॥ माहा सूद १० शनि ॥

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum :— III 64[a].

नैष्कर्म्यसिद्धि
With Comm.
( चन्द्रिका )

Naiṣkarmyasiddhi
With
( Comm. Candrikā )

No. 407

No. $\frac{365}{1895\text{-}1902}$

Size.— 10⅞ in. by 5¼ in.

Extent.— 82 leaves ; 15 lines to a page ; 48 letters to a line.

Description.— Country paper thin, smooth, tough and grey. Devanāgarī Characters ; handwriting medium, beautiful and uniform. Text in the cantre with comm. above and below it. Verse-numbers and key-words smeared with red chalk. All foll. are badly worm-eaten. Yellow pigment occasionally used for corrections. Ms. contains four chapters.

Age.— Old.

Text.— Sureśvarācārya.

Comm.— Jñānottama Miśra.

Begins.— fol. 1[a].

सुरेश्वराचार्यकृतनैष्कर्म्यसिद्धि सटीका प्रारंभः ग्र. ३६०० ॥ प. ९२ ॥

Fol. 1[b].

Text.—

श्रीगणेशाय नमः ॥

आब्रह्मस्तंभपर्यंतैः सर्वप्राणिभिः सर्वप्रकारस्यापि दुःखस्य स्वरसत एव जिहासितत्वात् तन्निवृत्यर्था प्रवृत्तिरस्ति स्वरसत एव ॥ etc.

Comm:—

ॐ नमः श्रीगणेशाय नमः ॥ श्रीरामचंद्राय नमः ॐ

परमात्मने श्रीनृसिंहाय नमः ॐ नमो भगवते वासुदेवाय ॥

विष्णोस्तत्परमं धाम द्योतमानं निजश्रिया ॥
अनंताभिमतद्वैतमात्मभूतं पुनातु नः ॥ १ ॥
तेजस्त्र्यंबकं भूयाद्भूयसे श्रेयसे मम ॥
यदाघामति निःशेषं भक्तानां भववारिधिं ॥ २ ॥
नैष्कर्म्यसिध्यभिधया सुधिया सुधियां व्यधात् ॥
योमृतत्वं नमामस्तं सुरेश्वरसुधानिधिं ॥ ३ ॥

तर्कोदग्रनखोन्निद्रवादिदैत्यभुजांतरः ।
प्रह्लादयतु नः शश्वत् ज्ञानोत्तममृगोत्तमः ॥ ४ ॥
चोलेषु मंगलमिति प्रथितार्थनाम्नि
ग्रामेवसन्पितृगुरोरभिधां दधानः ।
ज्ञानोत्तमः सकलदर्शनपारदृष्टा
नैष्कर्म्यसिद्धिविवृत्तिं कुरुते यथावत् ॥ ५ ॥ etc.

Ends.— fol. 82[a].

Text:— संबंधोक्तिरियं साध्वी प्रतिश्लोकमुदाहृता ॥
नैष्कर्म्यसिद्धेर्ज्ञात्वेमां व्याख्यातास्या भवे ध्रुवं ॥ ७९ ॥
इति श्रीशंकरभगवत्पूज्यपादसुरेश्वराचार्यकृते नैष्कर्म्यसिद्धिसंबंधोक्तौ चतुर्थोध्यायः ॥ ४ ॥

Comm.—
पदकशतहतकुमारिलसौगतगुर्वक्ष्यपादकणभक्ष्यः ।
यमनियमनिवलयधिषणो जयति श्रीसत्यबोधाचार्यः ॥ १ ॥
वस्तुख्यातिविघातिवादितिमिरं नैष्कर्म्यसिद्धिस्फुटां
व्याख्या चंद्रकया विधूय सुधियां सद्दृष्टिमुन्मीलयन् ।
अंतःसंभृतशांतिवेदनसुबोद्धांतः समुद्योतते ।
सर्वज्ञाश्रमचंद्रमास्त्रिजगती सर्वज्ञचूडामणिः ॥ २ ॥
इति श्रीमहोपाध्यायज्ञानोत्तममिश्ररचितायां नैष्कर्म्यसिद्धिचंद्रिकायां चतुर्थोध्यायः समाप्तः ॥ ४ ॥
नैष्कर्म्यसिद्धिटीकेयं ज्ञानोत्तमविनिर्मिता ॥
लेखिता विश्वनाथेन परमानंददा सतां ॥ १ ॥

References.—

(1) Mss.— A–Aufrecht's Catalogus Catalogorum:—
I 307[b]; II 67[a]; 208[a]; III 65[b].
B–Descriptive Catalogues:—
Ind. Off. Cat. I, iv, nos. 2317–8, pp, 741–2; II, i, nos. 5966–7, pp. 615–6.
Mad. Cat. IX, pp. 3435–8, nos. 4610–1.

(2) Printed Editions :—
Bombay Sanskrit Series, No. XXXVIII, editd by Col. G. A. Jacob, Bombay 1891.

न्यायदीपावलीटीका Nyāyadīpāvalīṭīkā

No. 408 No. $\frac{766}{1891-95}$

Size.— 10¼ in. by 3½ in.

Extent.— 33–6 = 27 leaves ; 12 lines to a page ; 34 letters to a line.

Description.— Country paper thin, rough, grey and musty. Devanāgarī Characters; handwriting medium small, clear and uniform. Borders ruled with double black lines; keywords smeared with red chalk. The foll are in a very bad state of preservation and the writing on many is indecipherable. Foll. 15–20 missing.

Age.— Appears to be old.

Author.— Ānubhūtisvarūpācārya.

Subject.— Advaita.

Begins.— fol. 1[a].

॥ न्यायदीपावलीटिपणं ॥ पत्र ॥ ३३ ॥

fol. 1[b].

श्रीगणाधिपतये नमः ॥

करोतु तुरगग्रीवो माकरः करुणां मयि ।
सुरासुरशिरोहारि रत्नराजि पदांबुजः ॥
अनंतमतिरत्नानामाकरापारसागरान् ।
गरीयसो गुरून्नौमि स्वांतमोहापहारिणः ॥ २ ॥
श्रीमदानंदबोधस्य विबुधानंददायिनः ।
न्यायदीपावलीटीका प्रार्तनाय प्रतन्यते ॥

न्यायदीपावल्याख्य प्रकरणं चिकीर्षुराचार्यश्चिकीर्षितस्याप्रकरणस्याविघ्नेन परिसमाप्तिपरिपंथिकल्मषविनिवृत्तये विशिष्टेष्टदेवतानमस्कारलक्षणं मंगलमाचरति ॥ जगदंकुरकंदायेति ॥ etc.

Ends.— fol. 33[a].

अनुभूति स्वरूपा ( lost ) यतिश्चकार चंद्रिकां ॥
व्याख्या ( lost ) त्तापि पुंसामानं ददायिनीं ।
अपारापारसंसारसागरोत्तारि ( lost ) हयग्रीवपदांबुजम् ॥

इति श्रीमदनुभूतिस्वरूपाचार्यकृतायां न्यायदीपावलीटीकायां द्वितीयोध्यायः समाप्तमिति ॥ ॥ श्रीमत् नरहरिचक्षु गोसांवि व्यासदत्तं ॥ श्रीकाशिनाथाय नमः ॥ ॥ श्रीविश्वनाथाय नमः ॥ श्रीभवानि नमः ॥ तुंडिराजाय नमः ॥ श्रीकालभैरवाय नमः ॥ श्रीरस्तु ॥ श्रीरामचंद्राय नमः ॥ ॥ ६ ॥ ॥ ६ ॥

References.—

(1) Mss.— A-Aufrecht's Catalogus Catalogorum :—
I 308[a]; II 67[b]; III 66[a].

B-Descriptive Catalogues :—

For original text of Ānandabodha see Ind. Off. Cat. I, iv, no. 2371, p. 757.

(2) Printed Editions :—

Original text with two others of the same author edited by N. S. N. Swāmi Balarāma Udaseen Mandalik, Chowkhamba Sansk. Ser. nos. 38, 62, 87, 117, Benares 1907.

---

## न्यायमकरन्द Nyāyamakaranda

No. 409 No. $\frac{285}{1895-1902}$

Size.— 10¾ in. by 4⅝ in.

Extent.— 53 leaves ; 12 lines to a page ; 45 letters to a line.

Description.— Country paper thin, rough, grey and greatly worn out. Devanāgarī Characters ; handwriting beautiful and uniform ; but foll. are badly defaced and the ink so faint at places that the writing is very difficult to read ; most foll. are besides curled at the edges. Borders ruled with triple black lines.

Age.— Appears to be old.

Author.— Ānandabodha Yati.

Subject.— Advaita.

Begins.— fol. 1[b].

॥ श्रीगणेशाय नमः ॥ श्रीसारदायै नमः ॥
॥ यद्भासा निखिलं विभाति विषयो यो न स्वयं ज्योतिषां ।
यस्याद्युर्भुवनोद्भवनिलयालीला ( lost ) सूरयः ॥
पंचांगोवर मामनंति मनसां वाचां च विश्वात्मने ।
तस्मै शुद्धसुखा द्वितीयवपुषे शश्वन्नमो ( lost ) ॥ १ ॥
निबंधपुण्यजालानि समालोच्य प्रयत्नतः ॥
सन्यायमकरंदानां संग्रहः क्रियते मया ॥ २ ॥ ( lost )

Ends.— fol. 53[a].

नाना... ( illegible and lost ) भवीवदात-
न्यायापदेशमकरंद कदंव एषः ॥
आनंदबोधयतिना निधिना गुणाना-
मानंदहेतुरकलंकधिया... ( lost ) ॥ १ ॥
सुरासुरशिरः पुञ्जरत्नपिंजरितांघ्रये ॥
नमः शिवाय शीतांशुकलाकलितमौलये ॥ २ ॥
सेवतां मतिमंदः सरह ( lost ) द्विकाविशब्दां ॥
आनंदबोधशशिनः शमयं तामांतरं तापं ॥ ३ ॥
आनंदबोधसुकवेः सूक्ति केनाभिनंदति ॥
वेद ( lost ) संज्ञं महापि ( illegible ) ॥ ठ ॥

इति श्रीन्यायमकरंदआनंदबोधयतिविरचितः समाप्तः ॥

References.—

( 1 ) Mss.—A–Aufrecht's Catalogus Catalogorum :—
I 309[a]; II 67[b].

B–Descriptive Catalogues :—

Mitra, *Notices*, IV, p. 259, no. 1682. ( attributed to *Citsukha* Muni, despite colophon mentioning Ānandabodha ; evidently the टीका is by चित्सुखमुनि ); Ind. Off. Cat. I, iv, nos. 2372, ( with चित्सुख's comm. ) 2373–4, pp 757–8.

( 2 ) Printed Editions :—

Chowkhamba Sk. Ser. nos. 38, 62, 87, 117, Benares 1907.

---

न्यायसुधा Nyāyasudhā

No. 410 No. $\frac{674\text{–A}}{1884\text{–}87}$

Size.— 12 in. by 5 in.

Extent.— 401 leaves ; 8 lines to a page ; 48 letters to a line.

Description.— Country paper thick, rough and grey. Devanāgarī Characters ; handwriting clear, beautiful and uniform. Borders ruled at places with two spaced double red lines. Yellow pigment used for corrections. Red chalk smeared

on important key-words. Occasional marginal notes and corrections or additions. This Ms. covers the second chapter of the Vedānta Sūtras. The chapter and pāda-endings as follows :—Ch. II, pāda i, fol. 149[a]; ii 355[a]; iii 400[a]; iv 401[a].

Age.— Not very old.

Author.— Jayatīrtha.

Begins.— fol. 1[b].

श्रीगणपतये नमः ॥ श्रीगुरुराजाय नमः ॥

हरिः ॐ ॥

यत्पदं वेदसंवेद्यं कटाक्षेणापि वीक्षितुं ॥
न क्षमंते विमतयस्तमुपासे श्रियः पतिं ॥ १ ॥

एकवाक्यतादि-सिद्धये प्रथमाध्यायार्थ-संगतत्वेन द्वितीयाध्यायार्थं विवक्षुरबुद्धि-स्थेन संगतेर्दर्शयितुमशक्यत्वात्प्रथमाध्यायार्थं तावदनुवदति ॥ उक्त इति ॥ etc.

Ends.— fol. 400[b].

तादृशास्तच्छब्दवाच्याः ॥

निर्णयस्य सिद्धांतस्य तादृशाश्चेत्कथं निर्णयं कुर्युरित्यत उक्तं सुनिर्णीतस्विति तादृशार्था इति विशेषः कुत एतदित्युक्तं स्वयमिति स्वयमेवेति संबंधः ॥ ॥ ६ ॥

इति श्रीमत्पूर्णप्रमति-भगवत्पाद-सुकृते-
रनुव्याख्यानस्य प्रगुण-जयतीर्थाख्ययतिना ॥
कृतायां टीकायां विषमपदवाक्यार्थविवृतौ ।
द्वितीयेध्यायेस्मिं चरमचर ( fol. 401[a] ) मचरणः पर्यवसितः ॥ ॥ ॥
इति श्रीमन्न्यासुधायां द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः ॥
॥ ॥ श्रीराम श्रीराम.

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum :—
I 311[b].
B-Descriptive Catalogues :—
*Ind. Off. Cat.* II, i, nos. 6033-4, p. 651.
Mitra, *Notices*, III, p. 344.
Mad. Cat. X, pp. 3609-10, no. 4820.

(2) Printed Editions :—
Edited by Apaśaṅkara Rāmācārya, T. R. Kṛṣṇamācārya. H. Vāsudevācārya, etc., Bombay 1897 (?).—cf Brit Mus. Cata. 1928, p. 418.

न्यायसुधा Nyāyasudhā

No. 411 No. 674-B / 1884-87

Size.— 12½ in. by 5 in.

Extent.— 259 leaves ; 8 lines to a page ; 47 letters to a line.

Description.— Country paper thin, rough and grey. Devanāgarī Characters ; handwriting bold, clear and uniform. Ms. contains the third chapter only. The *adhyāya* and *pāda* numbers (after the second one) shown regularly on the right margin. The *pādas* end as follows :—III. i. fol. 3[a] ; ii. iii. 187[a] ; iv. 259[a].

Age.— Not very old.

Author.— Jayatīrtha.

Begins.— fol. 1[b] :—

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

श्रीगुरुभ्यो नमः ॥ हरि ॐ ॥

कुपिताहिफणछायासमीकृत्यापरं सुखं ॥
सेवंते यत्पदं धीरास्तं भजे वल्लभं श्रियः ॥

साधनविचारोयमध्यायः वैराग्यार्थं गत्यादिनिरूपणाप्रथमपादे इत्यध्यायपादप्रतिपाद्यं etc.

Ends.— fol. 259[a].

अधिकरणद्वयस्य तात्पर्यं संक्षेपेणाह । एवमेवेति ॥ प्रारब्धस्य कर्मणो विरोधेनैव ज्ञानं दृष्टफलमिति प्रथमाधिकरणतात्पर्यं दृष्टं च तत्फलं चेति दृष्टफलं श्रवणाधिसंपूर्त्यनंतरमेव ज्ञानमुत्पद्यते यदि प्रारब्धकर्मप्रतिबंधकं नास्ति तस्मिंस्तु सति तदवसान इति एवमेवमुक्तिश्चैहैव लभ्यत इति द्वितीयस्य यस्मिन् देहे ज्ञानमुत्पन्नं तत्पातानंतरमेव मुक्तिर्लभ्यते प्रारब्धप्रतिबंधाभावे तद्भावे तु तदवसान इति ॥

इति श्रीमत्पूर्णप्रमतिभगवत्पादसुकृते-।
रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ॥
कृतायां टीकायां विषमपदवाक्यार्थविवृतौ ।
तृतीयेध्यायेस्मिंश्चरमचरणः पर्यवसितः ॥

इति श्रीमन्न्यासुधायां तृतीयाध्यायस्य चतुर्थः पादः समाप्तः ॥

इति तृतीयाध्याय समाप्तः ॥

न्यायसुधा Nyāyasudhā

No. 412 No. $\frac{674\text{–C}}{1884\text{–}87}$

Size.— $12\frac{5}{16}$ in. by $5\frac{1}{16}$ in.

Extent.— 62 leaves ; 8 lines to a page ; 48 letters to a line.

Description.— Country paper thin, rough and greyish. Devanāgarī Characters ; handwriting bold, clear and uniform. Ms. contains the fourth chapter. Chapter and *pāda*-numbers shown in the right margin. The *pādas* end as follows :—i. fol. $15^a$ ; ii. $56^b$ ; iii. $57^a$ ; iv. $62^b$.

Age.— Not very old.

Author.— Jayatīrtha.

Begins.— fol. $1^b$.

श्रीगणराजाय नमः ॥ श्रीवेदव्यासाय नमः ।
यदीयचरणांभोजछायामाश्रित्य निर्वृताः ॥
नदंति सततं मुक्ताः संश्रये तं श्रियः पतिं ॥ १ ॥

फलं निगद्यतेस्मिन्नध्याये इति भाष्यं ॥ फलनिरूपणस्येदानीं का संगतिरित्यत आह समन्वयेति ॥ etc.

Ends.— fol. $62^b$.

वचनप्रसूनमाला जयतीर्थाख्यभिक्षुणा रचिताः ॥
ध्रियतां हृदये सदये कमलामहिलेन पुरुषेण ॥ १ ॥
न वै दुष्यं भ्रांत्या न च वचनचातुर्यकुधिया ।
न मात्सर्यावेशान्न च चपलतादोषवनुतः ॥
परश्रद्धा जाड्यादळषिकृतिमाचार्यवचसि ।
स्खलन्नप्येतस्माज्जगति न हि निंद्योस्मि विदुषां ॥ २ ॥
अनुव्याख्यानमृतांभोधेः समुत्तातिनिर्मला ॥
इयं न्यायसुधा भौमैर्विबुधैः सेव्यतां सदा ॥ ३ ॥
इति श्रीमत्पूर्णप्रमितिभगवत्पादसुकृते–।
रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ॥
कृतायां टीकायां विषमपदवाक्यार्थविवृतौ ।
चतुर्थेध्यायेस्मिञ्चरमचरणः पर्यवसितः ॥

इति श्रीमन्न्यायसुधायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥

न्यायसुधा Nyāyasudhā

No. 413 No. $\frac{675\text{–A}}{1884\text{–}87}$

Size.— $11\frac{11}{16}$ in. by $3\frac{15}{16}$ in.

Extent.— 162 leaves ; 9 lines to a page ; 62 letters to a line.

Description.— Modern paper water-lined, thick, rough and greyish. Devanāgarī Characters ; handwriting medium small, clear and uniform. Ms. contains the third chapter only. Paper bears a shield and crown water-mark.

Age.— Modern, not very old.

Author.— Jayatīrtha.

Begins.— fol. 1[a].

श्रीवेदव्यासाय नमः ॥ निर्विघ्नमस्तु ॥
कुपिताहिफणछायासमीकृत्यापरं सुखं ॥
सेवंते यत्पदं धीरास्तं भजे वल्लभं श्रियः ॥ १ ॥ etc.

fol. 2[a].

इति श्रीमन् न्यायसुधायां तृतीयाध्यायस्य प्रथमः पादः ॥

Ends.— fol. 162[a].

इति श्रीमन्न्यायसुधायां तृतीयाध्यायस्य चतुर्थः पादः समाप्रस्तृतीयोध्यायः वेदव्यासार्पणमस्तु ॥ ६ ॥

---

न्यायसुधा Nyāyasudhā

No. 414 No. $\frac{675\text{–B}}{1884\text{–}87}$

Size.— $11\frac{11}{16}$ in. by $3\frac{15}{16}$ in.

Extent.— 31 leaves ; 11 lines to a page ; 78 letters to a line.

Description.— Modern paper water-lined, thick, rough and grey. Devanāgarī Characters ; handwriting minute, but clear and uniform. Ms. contains the fourth chapter. Paper bears a shield and crown water-mark.

Age.— Not very old.

Author.— Jayatīrtha.

Begins.— fol. 1[b].

श्रीवेदव्यासाय नमः निर्विघ्नमस्तु ॥
यदीयचरणांभोजछायामाश्रित्य निर्वृताः ॥ etc.

Ends.— fol. 31[b].

इति श्रीमन्न्यायसुधायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ ६ ॥ समाप्तीयं चतुर्थाध्यायः ॥ ६ ॥

श्रीमध्वांतर्गतश्रीव्यासार्पणमस्तु ॥

---

न्यायसुधा Nyāyasudhā

No. 415 No. 218/1899–1915

Size.— 10¼ in. by 4½ in.

Extent.— 49-9 leaves ; 11 lines to a page ; 52 letters to a line.

Description.— Country paper thick, rough, grey and discoloured. Devanāgarī Characters ; handwriting medium, clear and uniform. Borders ruled with two spaced black double lines. Yellow pigment used for corrections. The first 9 foll. are missing and Ms. is incomplete. Red chalk marks important citations in the work.

Age.— Old.

Author.— Jayatīrtha.

Begins.— fol. 10[a].

क्षत्रयेत्यंता सत्वं स्यादनिवारितं ।
धीनाश्यत्वेत्वनित्यत्वमेव स्यान्न मृषात्मना ॥ २ ॥
ममत्वस्यंतासत्वमेवमिथ्यात्वमिति नास्मत्प्रतिबंदी ॥
मिथ्यात्वनिरुक्तिभंगः ॥ ॥ अस्तु वा मिथ्यात्वं यत्किंचित् ॥ etc.

Ends.— fol. 49[b].

घटावछिन्नस्य घटात्यंताभावध्वंसादेर्घटदेशकालभिन्नदेशकालादित्वेपि अवछेदकस्य घटस्य तदभाववत् घटेछा ब्रह्मज्ञानयोर्घटज्ञा.

---

न्यायसुधा Nyāyasudhā

No. 416 No. $\frac{326}{1899-1915}$

Size.— 10¾ in. by 4½ in.

Extent.— 139 leaves ; 15 lines to a page ; 60 letters to a line.

Description.— Country paper thin, smooth, tough and grey. Devanāgarī Characters ; handwriting minutely small, but clear, legible and uniform. Borders ruled with double black ( foll. 1-93 ) or red ( foll. 94-139 ) lines. Foll. worm-eaten, musty and badly preserved. Text-citations marked with red chalk. Fol. 29 counted twice ;—after fol. 100 pagination begins from 1 to 39. Ms. incomplete, extending up to the 25th aphorism of the 1st *pāda* of the first *adhyāya*.

Age.— Appears to be very old

Author.— Jayatīrtha.

Begins.— fol. 1[b].

श्रीवेदव्यासाय नमः ॥ श्रीमदानंदभगवत्पादाचार्येभ्यो नमः ॥

श्रियः पत्ये नित्यागणितगुणमाणिक्यविशद-।
प्रभाजालोल्लासोपहतसकलावद्यतमसे ॥

जगज्जन्मस्येमप्रलयरचनाशीलवपुषे ।
नमो शेषामात्यस्मृतिहृदयदीक्षाय हरये ॥ १ ॥

येन प्रादुरभावि भूमिवलये व्यस्तारि गोसंततिः । etc.

fol. 2[a].

भगवता वादरायणेन प्राणिनां निश्रेयसाय प्रणीतमपि ब्रह्ममीमांसाशास्त्रमसाधु निबंधांधतमसावकुंठितत्वेनाप्रणीतमिव मन्यमानो भगवानानंदतीर्थो मुनिर्यथाचार्याभिप्रायमस्य भाष्यं धिधायानुभाष्यमपि करिष्यन्विलीनप्रकृतितयांतराय विधु... etc.

fol. 100[b].

॥ ॐ शास्त्रयोनित्वात् ॐ ॥ etc.

Ends fol. 139b.

अधिवेदगता शेषनाम्नामुपलक्षणस्य वेदमातुस्त्रैवर्णिक द्वितीयजन्मनि जन्या गायत्र्याः प्राध्याधान्येन तन्नाम्नाः समन्वयं प्रतिपादयितुं सूत्रं ॥ छंदोभिधानान्नेति चेन्न, तथा चेतोर्पणनिगदात्तथा हि दर्शनमिति ॥ छंदोगाः पठंति गायत्री हवा इदं सर्वं भूतमित्यादि ॥ तत्र संशयः किं गायत्री ब्रह्म किं वा

The piece of foll between foll. 138 and 139. Colophon:—

इति श्रीमत्पूर्णप्रमतिभगवत्पादसुकृते-।
रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ॥
कृतायां टीकायां विषमपदवाक्यार्थविवृता ।
वयंपूर्वाध्याये प्रथमचरणः पर्यवसितः ॥
इति श्रीन्यायसुधायां प्रथमाध्यायस्य प्रथमः पादः

## न्यायसुधाटीका — Nyāyasudhā-ṭīkā

No. 417 — No. $\frac{678}{1884\text{-}87}$

Size.— 12⅛ in. by 4¼ in.

Extent.— 115 leaves ; 8 lines to a page ; 47 letters to a line.

Description.— Country paper thin, tough and greyish. Devanāgarī Characters ; handwriting beautiful and uniform. Ms. ends abruptly on fol. 115 and is incomplete. No colophons ; The title given above is not to be found in the Ms., but verses 11-12 of the introductory part quoted below suggest this.

Age.— Fairly old.

Author.— Nārāyaṇa.

Begins.— fol. 1b.

श्रीगणेशाय नमः ॥ श्रीमदानंदतीर्थभगवत्पादाचार्येभ्यो नमः ॥

श्रियः पत्युः श्रीमच्चरणनखरत्नांशुकलिका ।
जरीहर्तुं ध्वांतं मम मनसि भक्त्यैव कलिता ॥

यदा संगा गंगा कमलजनिगंगाधरनुता ।
नृणामंगासंगान्ननु दुरितभंगाय भवति ॥ १ ॥ etc.

fol. 2[a].

पदवाक्यप्रमाणज्ञा ये विद्यामध्यजीगयन् ॥
शुकवन्मां नमस्यामि तानहं शिरसा सदा ॥ १० ॥
श्रीविश्वनाथतनयो नारायणसमाह्वयः ॥
सुधावगाहनाज्जन्म सफलीकर्तुमीहते ॥ ११ ॥
श्रीमन्न्यायसुधा प्रतिपदं यद्यप्यथापि क्वचित् ।
किंचिद्वाक्यपदप्रतीकमिपतः शक्त्या समास्याद्यते ॥
यन्मातुः कुचकुंभपूर्णपयसो गृह्णाति जातेः शिशु-।
र्बिंडंविदुमतश्च तृप्यति स किं दोषः ( 2[b] ) पयो बालयोः ॥ १२ ॥
नोवेदांतविचारकौशलमथो नो व्यावृतौ नैपुणं ।
नो वा न्यायकलापदक्षधिषणा नाप्युत्कटोपासा(स)ना ॥
एवं सत्यपि चापलं विदधतो युक्तोपहासार्हता ।
श्रोतव्यं गुणिभिस्तथापि कृपया कीरोक्तिवन्मे वचः ॥ १३ ॥
जयतीर्थमुनिः श्रीमान् विघ्नविध्वंसकाम्यया ।
सदाचारानुमितया श्रुत्या कर्तव्यतां गतं ॥
ग्रंथारंभे विशिष्टेष्टदेवतानतिमंगलं ।
विधाय शिक्षशिष्यार्थमाद्ये पद्ये निबद्धवान् ॥
॥ श्रीमदानंदतीर्थ भगवत्पादाचार्येभ्यो नमः ॥
श्रियः पत्यनित्यागणितगुणमाणिक्यविशद ।
प्रभाजालोल्लासापहतसकलावद्य तमसे ॥
जगज्जन्मस्थेमप्रलयरचना शीलवपुषे ( for°–वपुषे ) ।
नमो शेषान्नाय स्मृतिहृदयदीक्षाय हरये ॥ इति ॥
अत्र हरये नम इत्यन्वयः ॥ etc.

Ends.— fol. 115[b].

यद्यपि दर्शपूर्णमासाभ्यां स्वर्गकामोयजेत, आत्मा वा अरे द्रष्टव्यः इत्यादि वाक्यानां स्वार्थे बोधे समात्वेन नैराक्ष्यान्नपरस्परं पदैकवाक्यता वाक्यैकवाक्यता वा संभवति तथापि यथायूपं तक्षति यूपे पशुं बध्नातीत्यादिनां स्वार्थबोधे स—

References.—

( 1 ) Mss.—A-Aufrecht's Catalogus Catalogorum :—
II 87[b].

न्यायसुधाटिप्पणी Nyāyasudhāṭippaṇī

No. 418 No. 677/1884-87

Size.— 10½ in. by 4 in.

Extent.— 71 leaves ; 14 lines to a page ; 44 letters to a line.

Description.— Country paper thin, rough and dark grey. Devanāgarī Characters ; handwriting medium and legible, but not uniform. Borders ruled with double black lines. Key-words smeared with red chalk; yellow pigment profusely applied for corrections, marginal additions, corrections or notes. The name of the work or author has to be inferred as Ms. is incomplete. The superscription सु. टि. on left margin gives the title as सुधाटिप्पणी. Ms. extends to the end of जिज्ञासाधिकरण and beginning of the second aphorism.

Author.— Yadupati (?)

Begins.— fol. 1[b].

०॥ श्रीवेंकटेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥
ॐ पूर्णागमगुणादानमूर्त्तये पुण्यकीर्त्तये ॥
नमः श्रीपतये भक्तदत्तस्वानंद ( lost ) ॥ १ ॥

अथ परमकारुणिको जयतीर्थश्रीचरणो
ग्रंथोयमपि बह्वर्थो बाध्यं प्रीत्यर्थ विस्तरं ॥
बहुज्ञा एव जानंति विशेषेणार्थमेतयोरिति ॥
आचार्योक्तौ लोकानां विश्वासंमुपजनयन् अनुव्याख्यानव्याख्यां स आरभमाणो अभीष्टसमाप्त्यादिप्रयोजनकं श्रीपतिनतिनुतिरूपं मंगलं कृत्वा शिष्यशिक्षायै ग्रंथादौ निबध्नाति ॥ etc.

fol. 71[a].

॥ ६ ॥ ॐ जन्माद्यस्य यतः ॐ ॥

Ends.— 71[b].

आदिग्रहणादापो नाना इत्यादिवेति ॥
आदिपदेन " तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमे "ति स्मृति ग्राह्या ॥
शब्दादुपसर्जनतयेति ॥ पूर्वसूत्रे ब्रह्मजिज्ञासेति समासोपसर्जनतया प्रकृतत्वादित्यर्थः ॥

References.— See under सुधाटिप्पणी, No 676 of 1884-87.

**न्यायसुधाविवृति**
**( = वाक्यार्थचन्द्रिका )**

Nyāyasudhāvivṛti
( = Vākyārtha-candrikā )

No. 419

No. $\frac{679}{1884\text{-}87}$

Size.— $12\frac{1}{8}$ in. by $4\frac{5}{16}$ in.

Extent.— 429 leaves ; 9 lines to a page ; 48 letters to a line.

Description.— Country paper thin, rough and grey. Devanāgarī Characters ; handwriting bold clear and uniform. Ms. extends up to the end of ईक्षत्यधिकरण. Several foll. are badly discoloured.

Age.— Fairly old.

Author.— Vidyādhīśa Yati.

Begins.— fol. 1[b].

श्रीगणेशाय नमः ॥ श्रीमदानंदतीर्थभगवत्पादाचार्येभ्यो नमः ॥
श्रीश्रीगुरुभ्यां नमः ॥
नित्यागण्यबलद्युतिप्रमतिसत्सौख्याग्र्ये वीर्यातुलौ-
दार्यं प्राभवधीरतासुसगुणव्रातात्मदिव्याकृतिं ॥
संतापादिसमस्तदोषविधुरं वेदैकवेद्यं जग-
ज्जन्मादिप्रदमिंदिरेशमनिशं नारायणं नौम्यहं ॥ १ ॥ etc.

fol. 2[a].

अनुव्याख्याविधियुङ् न्यायसुधागाधसुरापगां ॥
गुरूणां दयया शुध्यै धियः सेवितुमुत्सहे ॥ ८ ॥
टीकाकारा ग्रंथादौ मंगलमाचरंति ॥ etc.

Ends.— fol. 429[b].

मध्वसच्छास्त्रजलधावामग्नो जगृहे रसं ।
तदृष्टया तोषयत्प्राज्ञान् गुरुमेघंतमाश्रये ॥ १ ॥
मया विरचिता न्यायसुधावाक्यार्थचंद्रिका ।
अनया भावि यत्पुण्यं तदाप्नोतु गुरुर्मम ॥ २ ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमद्वद्व्यासतीर्थपूज्यपादानां शिष्येण विद्याधीशयतिनां विरचितायां श्रीमन्यायसुधाविवृतौ वाक्यार्थचंद्रिकायां ईक्षत्यधिकरणं समाप्तं ॥ ॥ ॥ समाप्ता चेयमध्यायपादोद्धातपेटिका ॥ ॥

भग्नपृष्ठकटिग्रीव तच्च दृष्टिरधोमुखं ॥
कष्टेन लिखिते ग्रंथे यत्नेन परिपालयेत् ॥ १ ॥

॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum :— II 87[b].

न्यायामृत Nyāyāmṛta

No. 420 No. 696-C / 1882-83

Size.— $11\frac{1}{2}$ in. by $4\frac{1}{16}$ in.

Extent.— 18 leaves ; 10 lines to a page ; 48 letters to a line.

Description.— Country paper ; Devanāgarī Characters ; handwriting medium, legible and uniform. Borders ruled with double red lines. Ms. contains besides the present text, two fragments of Rāmācārya's Commentary on it. The text here extends up to दृश्यत्वादेराभासासाम्य

Age.— Fairly old.

Author.— Vyāsatīrthayati.

Begins.— fol. $1^b$.

श्रीमद्वेदव्यासाय नमः ॥ श्रीमध्वगुरवे नमः ॥ श्रीमन्नृसिंहाय नमः ॥ ॐ व्यां ॥ ॥ निष्प्रत्यूहमस्तु ॥

निखिलगुणनिकायं नित्यनिर्धूतहेयं ॥ etc.

[ See the following numbers ]

Ends.— fol. $18^a$.

व्यवहृतिव्यवहार्ययोः .संबंधांतरा भावात् ॥ सर्वं व्यवहार्यं व्यवहृतावध्यस्तमित्यादित्वबाधकमिति सुवचत्वात् ॥ दृश्यत्वादेशभासासाम्यं ॥ ॥ श्रीमद्वेदव्यासार्पणमस्तु ॥

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum :—

I $312^a$ ; II $68^b$ ; III $67^a$.

B-Descriptive Catalogues :—

Mad. Cat. X, PP. 3587-8, nos. 4796-7.

Weber, p. 181, nos. 620-1.

(2) Printed Editions :—

Edited by T. R. Kṛṣṇācārya, Bombay 1907-8, cf. B. M. Catal. 1928, p. 1277.

न्यायामृत Nyāyāmṛta

No. 421 No. 286/1879-80

Size.— $8\frac{2}{8}$ in. by 4 in.

Extent.— 181 leaves; 12 lines to a page; 40 letters to a line.

Description.— Country paper; Devanāgarī Characters; handwriting medium small but clear. Folios missing 1-25, 76-8, 82, 89, 173-4. All folios are discoloured. Outer margins worn out. There are blanks in the writing indicated by a top line as on fol. 35$^{b}$. Many folios are broken.

Age.— Fairly old.

Author.— Vyāsayati

Begins.— fol. 26$^{a}$.

... ध्यात्वलक्षणयुक्तमिति चेत् इदमपि तन्मात्रेण विलक्षणमपि स्पर्शत्वव्याप्य जातिविशेषवदाश्रयवत्वरूपानौष्ण्यलक्षणमिति समम्। ननु प्रतिभासिकस्यैव मिथ्यात्वं व्यावहारिकं व्यावहारिकस्य तात्विकस्य तात्विकमिति चेन्न। etc.

Ends.— fol 213$^{a}$.

नमो निरस्तदोपाय etc. upto प्रीणातु केशवः ॥

as in No. 422 followed by

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमद्ब्रह्मण्यतीर्थपूज्यपादानां शिष्येण व्यासयतिना संगृहीते न्यायामृते चतुर्थः परिच्छेदः ॥ ६ ॥ श्री ॥ ६ ॥

---

न्यायामृत Nyāyāmṛta

No. 422 No. 661/1884-87

Size.— $11\frac{1}{8}$ in. by 4 in.

Extent.— 147-12 = 135 leaves; 8 lines to a page; 45 letters to a line.

Description.— Country paper thin, tough but smooth and musty. Devanāgarī Characters; handwriting bold, legible and uniform. Borders ruled with double black lines. First 12 foll. missing. Yellow pigment used for corrections. Key-words and passages smeared with red chalk; marginal notes and additions. Many foll. discoloured. Ms. contains 4 chapters.

Age.— Appears to be very old.

Author.— Vyāsayati.

Begins.— fol. 13[a].

मनानंदत्वाप्रतिपत्तिरिति चेत् ॥ न ॥
तत्रानंदत्वजाते रसत्वे तत् व्यक्तेरानंदव्यक्तित्वासिद्धेः ॥ etc.

Ends.— fol. 147[a].

नमो निरस्तदोषाय समस्तगुणराशये ॥
विमलानंददेहाय कमलायतये सदा ॥ १ ॥

fol. 147[b].

मत्प्रेरकेण हरिणा या पूजा स्वस्य कारिता ॥
वाग्यज्ञरूपा लक्ष्मीशस्तया प्रीणातु केशव ॥ २ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमद्ब्रह्मण्यतीर्थपूज्यपादानां शिष्येण व्यासयतिना संगृहीते न्यायामृते चतुर्थः परिछेदः समाप्तः ॥ शुभमस्तु ॥ राम ॥ ॥ ६ ॥ ॥ ६ ॥ राम ॥

---

न्यायामृत Nyāyāmṛta

No. 423 No. 680/1884–87

Size.— 11¾ in. by 4 in.

Extent.— 124 leaves; 8 lines to a page; 54 letters to a line.

Description.— Country paper thin, rough and dark grey. Devanāgarī Characters; handwriting large, clear and uniform. Yellow pigment used for corrections. Key-words smeared with red chalk. Ms. ends abruptly on fol 124[a]. Many foll. discoloured and musty.

Age.— Fairly old.

Author.— Vyāsatīrtha-yati.

Begins.— fol. 1[b].

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥
श्रीवरदमूर्तये नमः ॥ श्रीलक्ष्मीनृसिंहाय नमः ॥

निखिलगुणनिकायं नित्यनिर्धूतहेयं ॥
शुभतममिति मेयं शुद्धसौख्याभ्युपायं ॥

सकलनिगमगेयं सर्वशब्दाभिधेयं ॥
नवजलधरकायं नौमि लक्ष्मीसहायं ॥ १ ॥

.....

अभ्रमं भंगरहितमजडं विमळं सदा ॥
आनंदतीर्थमतुळं भजे तापत्रयापहं ॥ ३ ॥

चित्रैः पदैश्च गंभीरैर्वाक्यैर्मानैरखंडितैः ॥
गुरुभावं व्यंजयंती भाति श्रीजयतीर्थवाक् ॥ ४ ॥

समुत्सार्य तमस्तोमं सन्मार्गं संप्रकाश्य च ॥
सदा विष्णुपदासक्तं सेवे ब्रह्मण्यभास्करं ॥ ५ ॥

ज्ञानवैराग्यभक्त्यादिकल्याणगुणशालिनः ॥
लक्ष्मीनारायणमुनीन्वंदे विद्यागुरून्मम ॥ ६ ॥

श्रीमध्वशास्त्रदुग्धाब्धिं धीमंथर महीभृता ॥
आमथ्योद्धियते न्यायामृतं विबुधतृप्तये ॥ ७ ॥

विक्षुब्धसंग्रहात्क्वापि क्वाप्युक्तस्योपपादनात्
अनुक्तकथनात्क्वापि सफलोयं श्रमो मम ॥ ८ ॥

ननु मिथ्यैव विश्वं तथा हि तत्र विप्रतिपत्तिः ॥ etc.

Ends.— fol. 124[a].

एवं चाहं ब्रह्मास्मि तद्योहं सासावित्यादौ परेणापि लक्षणानाश्रयणीया ॥ तस्मात् ॥ अज्ञोहमित्याध्यक्षात्तदात्मानमिति श्रुतेः ॥ अहमात्मेति च श्रुत्याहं च शुद्धात्मनः स्थितं ॥ ६ ॥ अहमर्थस्यानात्मभंगः ॥ ६ ॥ ॥ ६ ॥

---

न्यायामृत Nyāyāmṛta

No. 424 No. $\frac{681}{1884\text{–}87}$

Size.— $11\frac{15}{16}$ in. by $4\frac{1}{8}$ in.

Extent.— 27 leaves ; 8 lines to a page ; 35 letters to a line.

Description.— Country paper thin, rough, musty and discoloured. Devanāgarī Characters ; handwriting large, clear and legible. All foll. are badly discoloured. Writing is not uniform. Ms. incomplete, ending abruptly on fol. $27^b$.

Age.— Fairly old.

Author.— Vyāsatīrthayati.

Begins.— fol. $1^a$.

श्रीलक्ष्मीवेंकटेशाय नमः ॥ ॐ
निखिलगुणनिकायं नित्यनिर्धूतहेयं ॥ etc.

fol. $26^b$.

॥ ९ ॥ इति सत्वनिरुक्तिः ॥ ६ ॥ ॥

Ends.— fol. $27^b$.

शीघ्रमंथारगामित्वानथेह श्रुतिर्लिंगयोरिति ॥
यदाहवनीये जुहोतीत्यस्मात्पदे जुंहोतीत्यस्यैव विशेषविषयत्वाच्च ॥
प्रत्यक्षं हि विशिष्य घटसत्त्वग्रहिं ॥ श्रुतिस्तु
सामान्येन द्वितीयनिषेधिका ॥ किं—

---

न्यायामृत Nyāyāmṛta

No. 425 No. $\frac{682}{1884\text{–}87}$

Size.— $12\frac{1}{2}$ in. by $4\frac{1}{4}$ in.

Extent.— 54 leaves ; 7 lines to a page ; 53 letters to a line.

Description.— Country paper thin, brittle and rough. Devanāgarī Characters ; handwriting beautiful and uniform. Though the Ms. contains 54 leaves commencing from 1, the beginning is missing. Pagination absent on the first two foll.; Ms. is incomplete.

Age.— Fairly old.
Author.— Vyāsatīrtha-yati.
Begins.— fol. 1[a].

रकत्वावश्यं भावात् ॥ न द्वितीयः ॥
ब्रह्मण्यप्युक्तन्यायेन प्रतिफलितचित्फलभूतावरणभगरूपस्य
तदभिव्यक्तचिज्जन्यव्यवहाररूपस्य वातिशयस्य सत्वात् ॥ etc.

Ends.— fol. 53[a].

यद्वा एतदात्म्यमिदं सर्वं । तत्सत्यं स आत्मा तत्वमसीत्यत्र तदित्यनेन नात्मा परामृश्यते किं त्वैतदात्म्यं नपुंसकलिंगत्वात् ॥ ऐतदात्म्यमित्यस्य चैष चासावादात्मा च एतदात्मा तस्येदमैतदात्म्यं एतदीयं वस्तु त्वमसीत्यर्थः ॥ परमतेपि एतत् सत् आत्मा यस्य तदैतदात्म्यमिति व्याख्यातत्वात् भावप्रत्ययो व्यर्थः ॥ ततो वरमर्थांतरा श्रवणं विचित्राहित ॥

---

## न्यायामृततरंगिणी — Nyāyāmṛtataraṅgiṇī

No. 426 — No. 696–A / 1882–83

Size— $11\frac{1}{2}$ in. by $4\frac{1}{16}$ in.
Extent.— 49 leaves ; 11 lines to a page : 48 letters to a line.
Description.— Country paper thick, rough, musty and discoloured. Devanāgarī Characters ; handwriting small, but legible. Borders ruled with two spaced double red lines. In the first few foll. key-words smeared with red chalk. Ms. contains two other fragments of the same work ( See Nos. 696–B & C of 1882–83 ). Ends on fol. 49 with दृश्यत्वहेतुभंग.
Age.— Fairly old.
Author.— Rāmācārya.
Begins.— fol. 1[b].

॥ श्रीमद्वेदव्यासाय नमः ॥ ॥ निरंतरायोस्तु ॥ ॐ व्यां ॥
॥ श्रियः सदानंदगुणैर्भृतं भुजे etc.

Ends.— fol. 49[a].

व्यासाद्रिस्तुततर्काब्जपूरैः पक्षयुगं युजि ॥
न्यायामृतरंगिण्यां दृश्यत्वं दृश्यतां बुधैः ॥
॥ इति दृश्यत्वहेतुभंगः ॥ ॥ श्रीवेदव्यास ॥

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum :—
I 312[b] ; II 68[b] ; III 67[a].

(2) Printed Editions :—
Edited by T. R. Kṛṣṇācārya, Kumbakonam.
Bombay 1910 ;—cf. B. M. Catal. 1928, p. 848.

---

## न्यायामृततरङ्गिणी — Nyāyāmṛtataraṅgiṇī

No. 427 — No. $\frac{696\text{-B}}{1882\text{-}83}$

Size.— 11½ in. by 4$\frac{1}{16}$ in.

Extent.— 22 leaves ; 11 lines to a page ; 48 letters to a line.

Description.— Country paper thick, rough, musty and discoloured. Devanāgarī Characters ; handwriting small, clear but not quite uniform. Borders ruled with two spaced double red lines. Yellow pigment used for corrections ; red chalk smeared over important words. Ms. ends with दृश्यत्वादेरुपाधि of the first chapter. Contains two other Mss. of the same work.

Age.— Fairly old.

Author.— Rāmācārya.

Begins.— fol. 1[a].

श्रीमद्वेदव्यासाय नमः ॥ ॐ व्यां ॥

त्वन्मत इति ॥ तथा च तत्रासिद्धिरिति भावः ॥ शुद्धात्मन इति ॥ तथा च तत्र व्यभिचार इति भावः ॥ शुद्धेपीति ॥ तथा शुद्धात्मनि हेतोरगमनान्न व्यभिचार इत्यर्थः ॥ कल्पितेनेति ॥ ऋयोगोलकादौ कल्पितेन... etc.

Ends.— fol. 21[b].

तस्मात्प्रतिकर्मव्यवस्थानुपपत्या न जगत्प्रतिभासमात्रशरीरमिति नोपाधेः साधनवतः पक्षादव्यावृत्तिरिति ॥ पररीत्या चायमुपाधिर्द्रष्टव्यः ॥ ॥ श्री ॥

॥ ॥ व्यासाद्रिस्तुततर्कांबुपूरैः पक्षयुगं युजि ॥
न्यायामृततरंगिण्यां दृश्यत्वादेरुपाधयः ॥
॥ दृश्यत्वादेरुपाधि ॥

fol. 22[b].

न्यायमृततरंगिण्यां दृश्यत्वा. पत्र २२ सं. ८००.

---

न्यायामृततरङ्गिणी Nyāyāmṛtataraṅgiṇī

No. 428 No. $\frac{697}{1882-83}$

Size.— 8¼ in. by 3⅞ in.

Extent.— 26 leaves ; 11 lines to a page ; 29 letters to a line.

Description.— Country paper thin, rough, old and musty. Devanāgarī Characters ; handwriting small, legible but not uniform. Key-words smeared with red chalk. Ms. contains the third chapter, but ends abruptly. Borders ruled with single or double black lines.

Age.— Very old.

Author.— Rāmācārya.

Begins.— fol. 1[a].

तरंगिणी चतुर्थ प्र—

fol. 1[b].

श्रीवेदव्यासाय नमः ॥

निर्गुणं करधृतार्वसद्गुणं दूरदोषमुरुदोषमप्यलं ॥
पार्थसारथिमपार्थसारथिं नंदनंदततिसाधनं नुमः ॥ १ ॥
निदिध्यासनमंगि etc.

Ends.— fol. 26[b].

अतिप्रसंगेनेति । क्षणिकत्वात्पत्तिरुपेण ॥
शुद्धेति ॥ ननु वृत्तिमादायैव ब्रह्मण उपहितत्वेन—

---

न्यायामृततरङ्गिणी Nyāyāmṛtataraṅgiṇī

No. 429 No. $\frac{683\text{-B}}{1884-87}$

Size.— 12⅜ in. by $4\frac{5}{16}$ in.

Extent.— 27 leaves ; 8 lines to a page ; 48 letters to a line.

Description.— Country paper ; Devanāgarī Characters; handwriting good and uniform. See No. 431 for full description. Ms. covers the third and fourth chapters.

Age.— Fairly old.

Author.— Rāmācārya.

Begins.— fol. 1$^b$.

श्रीराम ॥

निर्गुणं करधृतार्वसद्गुणं दूरदोषमुरुदोषमप्यलं ।
पार्थसारथिमपार्थसारथिं नंदनदवतिसाधनं नुमः ॥ १ ॥

निदिध्यासनमंगिश्रवणादिकमंगमित्येतदाक्षिपति नन्वेतदिति etc.

fol. 19$^b$.

शाब्दप्रत्यक्षत्वभंगः ॥ ॥ इति तरंगिण्यां
तृतीयपरिछंदः ॥

Ends.— fol. 27$^b$.

अनेन अत्रोक्तन्यायानां मूलशास्त्रोक्तत्वं सूचितं ॥ ६ ॥
मुक्तामपि ब्रह्मादीनां तारतम्यसमर्थनं ।
॥ इति न्यायामृततरंगिण्यां चतुर्थपरिछेदः समाप्तमगमत् ॥

---

न्यायामृततरङ्गिणी Nyāyāmṛtataraṅgiṇī

No. 430 No. $\frac{684}{1884\text{–}87}$

Size.— 11$\frac{5}{8}$ in. by 3$\frac{7}{8}$ in.

Extent.— 65 leaves ; 9 lines to a page ; 48 letters to a line.

Description.— Country paper thick, rough, musty and discoloured. Devanāgarī Characters ; handwriting medium, beautiful and uniform. Occasional smearing of key-words with red chalk, marginal notes and comments. Ms. extends to the section ( दृश्यत्वहेतुभंग ) of the first chapter.

Age.— Appears to be quite old.

Author.— Rāmācārya.

Begins.— fol. 1$^b$.

श्रीवेदव्यासाय नमः ॥ अविघ्नमस्तु ॥

॥ श्रियः सदानंदगुणैर्भृतं भुजे भुजेष्यदोषं तदशेषशक्तितः ॥ etc.

Ends.— fol. 65$^b$.

तस्मान्नैतदपि समाधानं युक्तमिति सर्वमवदातं ॥ ३ ॥ ॥

॥ व्यासाद्रिस्तुततर्कांबुपुरैः पक्षयुगं युजि ॥
न्यायामृततरंगिण्यां दृश्यत्वं दृश्यतां बुधैः ॥

॥ दृश्यत्वहेतुभंगः ॥ ॥ स्वन्मत इति । तथा च तत्रासिद्धिरिति भावः ॥ शुद्धात्मन इति ॥ तथा च तत्र व्यभिचार इति भावः ॥ शुद्धेपीति ॥ तथा च शुद्धात्मनिहेतोरगमनान्न व्यभिचार इत्यर्थः ॥ कल्पिते-नेति अयोगोलकादौ कल्पितेन वन्ह्यभावेन वन्हेरपि घू—

---

न्यायामृततरङ्गिणी Nyāyāmṛtataraṅgiṇī

No. 431 No. $\frac{683\text{-A}}{1884\text{-}87}$

Size.—$12\frac{3}{8}$ in. by $4\frac{5}{16}$ in.

Extent.— 412 leaves ; 8 lines to a page ; 48 letters to a line.

Description.— Country paper thin, rough and grey. Devanāgarī Characters ; handwriting large, clear and uniform. Ms. covers the first chapter only. A few key-words or phrases sporadically smeared with red chalk. See No. 430 for a second but independent part of this Ms. Both are full of clerical errors, especially in the use of the *anusvāra* and other signs.

Age.— Fairly old.

Author.— Rāmācārya.

Begins.— fol. $1^b$.

श्रीगणेशाय नमः ॥ अविघ्नमस्तु ॥

श्रियः सदानंदगुणैर्मृतं भुजे भुजेऽप्यदोषं तदशेषशक्तिभिः ॥
विशेषवाणी मितमात्मनो मुदामुदारमीशं प्रियबल्लवं नुमः ॥ १ ॥

साधुप्रसाधितगुणोपनिषत्सखीभि-
सूत्रग्रहानुसृतकंचुकिवाचि दक्षा ।
वंशाग्रगापि जयवाक् शुचि नर्त्तकीयं
चित्तं जहार तमपारकृपं नमामि ॥ २ ॥

ऋगुपनिषददुर्गात् दूरयन् योरिवर्गान् ।
अधिहरि विजयादिव्यास एवोदपादि ॥
स जयति यतिराजः सर्गं उच्चैविराजः ।
परिधृतजयसज्ञः सर्वविद्यास्वभिज्ञः ॥ ३ ॥

शुकेन शांत्यादिषु वाङ्मयेषु व्यासेन धैर्यं बुधिनोपमेयं ॥
मनोजणित्यां मनसां हि पत्या रघूत्तमास्यं सुगुरुं नमामि ॥ ४ ॥

छंदः सांगमुरंगमंगलगवीर्जैमिन्युपज्ञं मत-
व्यासोदंतमवृब्रुधच्च समधाद्यो विश्वनाथाभिधां ॥
धर्मे व्याकृतपूर्णधीकृतसदाचारस्मृतिव्याकृति-
व्याजेन प्रणमामि तं पितरमुद्बोधाय शब्दार्थयोः ॥ ५ ॥

पदादिविद्याबहुविन्निषद्या अध्येषितत्वैषिवराद्यतोहं ।
नमामि तं व्यास[p. 52ª]कुलावतंसं नारायणाचार्यमथाग्रजं मे ॥ ६ ॥

fol. 2ª.

व्यासबिंदूरसाचार्यकृती षट्त्याकृतिछलात् ॥
रामो महत आनत्य श्रुतं सौवंशुशुत्सत्तिः ॥ ७ ॥

उद्यद्व्यासमहोदधेर्यदुरुधीगंभीरकुंभी नयत् ।
भंगान्सत्प्रतिबिंबमंबुजदशापत्री विचित्रीकृतं ॥
स्वछंदोत्थतरंगिणी द्विजमुखैर्न्यायामृतं व्याकृतं ।
सेवं सेवमिरासुराइनसभे राजंतु लेखा इव ॥ ८ ॥

इह खलु सकलविद्वन्मणिचिंतामणिर्व्यासतीर्थबिंदुः पुण्यप्रचय-पूर्णवेदांतश्रवणश्रुतमर्थं मिमनिषया निविथत्सुर्निबंधगोचरपरीक्षकप्रवृत्यंग-विषयादिवक्तुं विशिष्टविषयादिमद्ब्रह्ममीमांसया निबंधं संबंधयितुं चतुर्लक्षणो विविक्षितविशेषणचतुष्टयत्वे नेष्टदेवतामभिष्टवीति ॥ निखिल-गुणनिकायमित्यादिना ॥ etc.

Ends.— fol. 412ª.

जात्याद्युक्तवलेक्षणानुमितिसत्सूत्रागमानायती ।
न्यक्करश्रितसिद्धिपूर्वसकलाभासाक्षपक्षिक्षितं ॥
ब्रह्मैवेदमितिश्रुतिप्रमुखसन्मातृप्रियत्वच्युतं ।
दृश्यत्वादिकुर्वादिहेतुचटकंदको वाद्रियादद्रिये हृत् ॥ १ ॥

fol. 412ᵇ.

विश्वं भद्रभवंति यद्विविषदः सत्यं तदित्यादिक- ।
श्रुत्यातर्कमुदर्क एव बहुधा भद्रोदिशव्दंश्रिता ॥
शंकासिद्धिमहाकुशाहतकदाशंकालचोत्सर्गतः ।
प्रामाण्येन विमतेः सत्वं चितीवस्थितं ॥ २ ॥

शुकादिदिग्वोभिरपींद्रसंपदो यदिछया काकणिका धरोत्कृताः ॥
सवल्लवीपल्लववेतिल्लितांगुलिर्मुरं द्विषंस्तुष्यतु मे वचश्रिया ॥ ३ ॥

व्यासाद्रिस्तुततर्कांबुपूरैः पक्षयुगं युजि ॥
न्यायामृततरंगिण्या सत्ता त्रैविध्यखंडनं ॥
सत्तात्रैविध्यभंगः । इति न्यायामृततरंगिण्या प्रथमपरिछेदः ॥
॥ ६ ॥ ॥ ६ ॥

पंचकोशविवेक
( सटीक )

Pañcakośaviveka
( with Comm. )

No. 432

No. 292-C / 1879-80

Size.— 11 in. by 5 in.

Extent.— 12 leaves ; 10 lines to a page ; 51 letters to a line.

Description.— Country paper thick, tough and grey ; Devanāgarī Characters ; handwriting medium large, clear and uniform. Borders ruled with brown ink in double lines over two black lines. Floral design on last fol.; for other description see *Tattvaviveka* ( No. 306 ) ; Ms. is the third chapter of Pañcadaśī.

Age.— Fairly old.

Author.—

Text.— Vidyāraṇya.

Comm.— Rāmakṛṣṇa.

Begins.— fol. 1[b].

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥

श्रीगोविंदाय गुरवे नमः ॥

॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥

पंचकोशविवेकस्य कुर्वे व्याख्यां समासतः ॥ १ ॥ etc.

Text.—

गुहाहितं ब्रह्म यत्र पंचकोशविवेकतः ।

बोद्धुं शक्यं ततः कोशपंचकं प्रविविच्यते ॥ १ ॥ etc.

Ends.— fol. 12[a].

Text.—

य एवं ब्रह्म वेदैष ब्रह्मैव भवति स्वयं ॥

ब्रह्मणो नास्ति जन्मातः पुनरेष न जायते ॥ ४३ ॥

इति पंचकोशविवेकः समाप्तः ॥

Comm.—

॥ इति श्रीमत्परमहंस ..... श्रीभारतीतीर्थविद्यारण्यमुनिवर्य-किंकरेण रामकृष्णाख्यविदुषा विरचिता पंचकोशविवेकव्याख्या समाप्ता ॥

fol. 12[b].

॥ इति कोशविवेकः ॥ ३ ॥

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum:—
I 314[a].

पंचकोशविवेकव्याख्या Pañcakośavivekavyākhyā

No. 433 No. 242/1882-83

Size.— 10§ in. by 4§ in.

Extent.— 14 leaves ; 9 lines to a page ; 45 letters to a line.

